INTERNATIONAL JOURNAL OF EXPLORING EMERGING TRENDS IN ENGINEERING
Peer-Reviewed, Refereed, Indexed and International Journal, https://ijoeete.com/
|ISSN No. 2394-0573 |Volume: 10, Issue: 2 | July - Dec 2023

# वेदेषु स्त्रियः

[1] बा.नागराजः, [2]Dr. Sadhana Devi
[1]Research Scholar, [2]Supervisor
[1-2] Department of Sanskrit, NIILM University, Kaithal, Haryana, India

## उपोद्घातः

आकाशादिमहाभूतान् स्वयम्भूः भगवान् नारायणः व्यञ्जयन्प्रादुरभवत्, अर्थात् अतीन्द्रियग्राह्यः सूक्ष्मः अव्यक्तः अचिन्त्यः सर्वभूतमयः नारायणः स्वयमेव उद्बभौ । ततः पूर्वकल्पमभिध्याय स्वकीयाच्छरीरात् लोकान् ससर्ज । सृष्टिक्रमः यथा आदौ सः जलमेव ससर्ज । पुनश्च तास्वप्सु बीजमवासृजत् । तद्बीजं तु सहस्रांशुसमप्रभं हेममण्डमभवत् । तस्मात् हेमाण्डात् स्वर्लोकपितामहः ब्रह्मा स्वयं जज्ञे । ततः ब्रह्मा स्वर्गादीनां लोकानां, जरायुजाण्डजस्वदेजोद्भिजादीनां जीवानां, स्थावरजङ्गमादीनां सकलप्रपञ्चानां सर्जनमकुरुत।

## प्रजासृष्टिः

स ब्रह्मा स्वदेहं स्त्रीपुरुषरूपे द्विखण्डं कृत्वा तस्यां स्त्रियां स्वयमेव तं पुरुषं मैथुनधर्मेण सम्भोगयित्वा पुरुषमसृजत् । प्रजासृष्टिः अन्यप्रकारेणापि कथ्यते । ब्रह्मा सनन्दनादयान् पुत्रान् स्वयमेवासृजत् । किन्तु ते वीतरागाः निरपेक्षाश्चाभवन् । अतः ब्रह्मा स्वदेहादेव स्वायम्भुवं मनु, निर्धूतकल्मषां शतरूपां नारीञ्चासृजत् । तां शतरूपां मनुः स्वायम्भुवः पत्नीत्वेन जगृहे । तस्माच्च पुरुषाद् देवी शतरूपा प्रियव्रतोत्तानपादौ पुत्रौ, प्रसूत्याकृतिसंज्ञिते पुत्र्यौ च जनयामास । अतः प्रथमः पुरुषः स्वायम्भुवः मनुः शोभते । प्रथमा स्त्री शतरूपा शोभते । ब्रह्मा अथर्वधार्मिकविधिना स्त्रीमसृजदित्यपि कथ्यते ।

## स्त्रीणामुत्कृष्टगुणाः

स्त्रीष्वनेकाः सद्गुणाः सन्ति । वात्सल्यम्, प्रसक्तिः, उत्सर्गः, भक्तिः, सहिष्णुता, स्थायित्वम्, तितीक्षा, क्षमा, औदार्यम्, शालीनता, आत्मोत्सर्गः, गुरुजनसेवा इत्यादयः वाञ्छनीयमानवीयगुणाः स्त्रीणामुत्कृष्टगुणाः । एते गुणाः पुरुषेभ्यः स्त्रीष्वेवाधिकं दृश्यन्ते । एतदतिरिच्य विवाहिताः नार्यः पातिव्रत्यम्, कुटुम्बपोषणम्, आतिथ्यम् इत्यादि गुणानप्याचरन्ति।

## वेदेषु स्त्रियः

वेदाः विश्वस्य प्राचीनतमाः वाङ्मयाः । भारतसनातनधर्मानुसारेण वेदाः अपौरुषेयाः । ते देवपितृमनुष्याणां चक्षुरिति कथ्यन्ते । धर्मस्याधाराः वेदाः एव ।

**"धर्म जिज्ञासमानानां परमं श्रुतिः" ॥**[1]

महाभारतानुसारेण पूर्वं वेदाः एकमेवासीत् । प्रतिचतुर्युगे द्वापरयुगस्यान्ते व्यासः आविर्भूय कलियुगजनानां सुविधार्थं वेदं चतुर्धा विभजति इदानीं वैवस्तमनोः काले सप्तविंशतिचतुर्युगानन्तरम् अष्टाविंशतितमे कलियुगे भगवान् श्रीमन्नारायणः स्वयमेव व्यासरूपे अवतीर्य वेदं चतुर्धा विभज्य स्वशिष्येभ्यः ददौ इति । ते वेदाः चत्वारः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति । एते वेदाः चतुर्भागैः संकलिताः दृश्यन्ते । ते च संहिताब्राह्मणमारण्यकमुपनिषदश्च ।

संहितासु प्रायेण स्तोत्राणि, मन्त्राः, आशिषः, प्रार्थनाश्च यागौपयिकत्वेन संकलिताः । गद्यमयब्राह्मणभागेषु यागप्रकार- निरूपणं, तत्तत्कर्मसु साख्यायिकाप्रदर्श च वर्णितम् । ब्राह्मणामन्तिमभागारण्यकेषु अध्यात्मवादः विशदीकृतः आरण्यकानामन्तिमभागोपनिषत्सु वेदान्ततत्त्वज्ञानं विशदीकृतम् । वेदेषु कतिपयशिक्षाप्रदाख्यानान्यपि वर्तन्ते । एते एव मनुष्याणामन्तःकरणे नैतिकमूल्यान् सुसंस्कारांश्चोत्पाद्यन्ते । वेदेषु मनुष्यस्य जन्मादरभ्य मृत्युपर्यन्तं

INTERNATIONAL JOURNAL OF EXPLORING EMERGING TRENDS IN ENGINEERING
Peer-Reviewed, Refereed, Indexed and International Journal, https://ijoeete.com/
|ISSN No. 2394-0573 |Volume: 10, Issue: 2 | July - Dec 2023

करणीयानि यज्ञकर्माणि प्रतिपादितानि । वेदानां प्रधानलक्ष्यं जीवस्य मोक्षप्राप्त्युपाय- ईश्वरोपासना-धर्मानुष्ठान-ब्रह्मचर्यपालन-सत्सङ्गस्य महत्वमित्यादि विषयाणां प्रतिपादनम् । एतैः सह कर्मफलप्राप्त्यर्थं संस्काराणां निरूपणं, समुचितजीवनयापनार्थं वर्णाश्रमव्यवस्था च वेदैः विधीयन्ते । अतः व्यासमहर्षिः सर्वे वेदे प्रतिष्ठितमन्यत्र नेति उवाच।

**सर्वं विदुर्वेदविदो वेदे सर्वं प्रतिष्ठितम् ।**
**वेदे हि निष्ठा सर्वस्य यद् यदस्ति च नास्ति च ॥**[2]

**ऋषयः**

महत्वपूर्ण - ऋग्वेदसंहितासूक्त - पठनात्पूर्वं प्रत्येकमन्त्रस्य ऋषिदेवताछन्दानामुल्लेखः क्रियते । यास्काचार्यानुसारेण ये मन्त्रान् साक्षात्कारं कृतवन्तः ते ऋषयः इत्याह्वयन्ते ।

**साक्षाद्कृतधर्माण ऋषयो बभूव ॥**[3]

ऋक्सर्वानुक्रमण्यनुसारेण ये मन्त्रान् ग्रहीतवन्तः ते ऋषयः इति ज्ञायन्ते । अतः 'ऋषि' शब्दस्य मन्त्रद्रष्टा अथवा मन्त्रवक्ता इत्यर्थः । ऋषीणां विवरणं कात्यायनस्य सर्वानुक्रमण्यां, आर्षानुक्रमण्यां, शौनकस्य बृहद्देवतायाम् एवं सायणाचार्यस्य भाष्येषु च लभ्यते ।

**ऋषीणां नामानि**

ये मन्त्रद्रष्टारः स्त्रियः आसन् ते ऋषिकाः इति प्रथिताः । ऋग्वेदसंहितायां त्रिंशदधिकर्षिकाणाम् उल्लेखः कृतः बृहद्देवतायाम् ऋषिकाः गणत्रये विभक्ताः सन्ति । प्रथमगणे नवऋषिकाः देवान् तुष्टुवुः । ताः घोषा, गोधा, विश्ववारा, अपाला, उपनिषत्, निषत्, जुहूर्नाम ब्रह्मजाया, अगस्त्यस्य स्वसा, अदितिश्च । द्वितीयगणे नवऋषिकाः याः देवताश्च उल्लिखिताः । ताः इन्द्राणी, इन्द्रमाता, सरमा, रोमशा, ऊर्वशी, लोपामुद्रा, नद्यः, यमी, शाश्वती च । तृतीयगणे नवऋषिकाः याः आत्मनः भाववृत्तानि, देवताश्च उल्लिखिताः । ताश्च श्रीर्लाक्षा, सार्पराज्ञी, वाक्, श्रद्धा, मेधा, दक्षिणा, रात्री, सूर्या, सावित्री चान्तर्गताः । अमूः सप्तविंशतिः ऋषिकाः 'ब्रह्मवादिन्यः' इति कथ्यन्ते । ताः यथा

**"घोषा गोधा विश्ववारा अपालोपनिषन्निषत् । ब्रह्मजाया जुहुर्नाम अगस्त्यस्य स्वसादितिः ॥ इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी । लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥ श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा । रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः" ॥**[4]

**घोषा -** घोषायाः कथा बृहद्देवतायाम् उल्लिखिता । काक्षीवत्पुत्री घोषा रोगेण विरूपशरीरं प्राप। ततः सा षष्ठिवर्षाः पितुर्गेहे उवास । भर्तापुत्रौ विनैव वृद्धावस्थां प्राप्ता । अतः सा भगवन्तं शरणं प्राप्य अचिन्तयत् 'यथा मम पिता काक्षीवत् अश्विनीदेवौ पूजयित्वा यौवनं, स्वास्थ्यं, शक्तिञ्च प्राप, तथैव अहमपि यौवनं, सौभाग्यं, सौन्दर्यञ्च प्राप्तुम् अश्विनीदेवौ पूजयामि' इति। अनन्तरं द्वाभ्यां सूक्ताभ्यां अश्विनीदेवौ तुष्टाव । अश्विनीदेवौ तां विमुक्तरोगीं कृत्वा तस्यै पतिं पुत्रं सुहस्त्यमुनिं च ददतुः ।

**चिन्तयन्तीति सूक्ते द्वे यो वां परि ददर्श सा । स्तुतौ तावश्विनौ देवी प्रीतौ तस्या भगान्तरम् ॥**
**प्रविश्य विजयरारोगां सुभगां चक्रतुश्च तौ । भर्तारं ददतुस्तस्यै सुहस्त्यं च सुतं मुनिम् ॥**
**ददतुस्तत्सुपर्णाभ्यां यन्नासत्येति कीर्त्यते । काक्षीवत्यै च घोषायै न तस्यामाजुरोऽनया।।**[5]

**मैत्रेयी**

मैत्रेय्याः वृत्तान्तं बृहदारण्यकोपनिषदि वर्णितम् । महर्षियाज्ञवल्क्यस्य मैत्रेयी, कात्यायनीति द्वे भार्ये आस्ताम् । द्वे सदाचारिण्यौ, पतिव्रते चास्ताम् । किन्तु मैत्रेयी परमात्मानं प्रति अनुरागिणी आसीत्, कात्यायनी संसारभोगानुरागिणी

आसीत् । महर्षिः याज्ञवल्क्यः संन्यासग्रहणसमये मैत्रेयीमाहूय उवाच ' मैत्रेयी ! अधुनाऽहं गृहस्थाश्रमं त्यक्त्वा संन्यासं ग्रहीतुं स्पृहये । अतः ममाभावे युवां द्वे अन्योन्यं कलहं विना सुखेन जीवेताम् । गृहसम्पत्तिं द्वाभ्याम् अर्धार्धभागं कृत्वा ददामि' इति । तच्छ्रुत्वा मैत्रेयी मनसि इत्थं चिन्तयाञ्चकार 'सामान्येन मानवः यदा सन्निहितवस्त्वपेक्षया उत्तमवस्तु प्राप्नोति, तदा स्वसमीपवस्तु त्यजति । महर्षिः याज्ञवल्क्यः इदानीं गृहादीन् त्यक्त्वा ततः परं वस्तु प्राप्तुमेव गच्छति । तत्परमवस्तु जन्ममरणबन्धनात् नरं मुञ्चति, अमृतत्वं प्रदास्यति' इति । एतदनन्तरं मैत्रेयी याज्ञवल्क्यं प्रति उवाच 'भगवन्! यद्यहं धनधान्यपरिपूर्णसमस्तभूः प्राप्नोमि, तर्हि मया अमृतत्वं प्राप्तुं शक्यते वा?' इति । याज्ञवल्क्यः अवोचत् 'नैव, धनसहितभूप्राप्त्या त्वया आढ्यजीवनमेव जीवितुं शक्यते, परन्तु कदापि अमृतत्वं प्राप्तुमशक्यमिति' ।

**"सा होवाच मैत्रेयी। यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवित स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति" ॥**[6]

मैत्रेयी पुनरुवाच - 'हे भगवन् ! तादृशसामान्यनश्यवस्तु प्राप्य मह्यं किं प्रयोजनम् ? अतः

**भवान् तत्परमं वस्तुज्ञानं ख्यापयतु, यस्य कृते भवान् धनं गृहं त्यक्तुमिच्छसि' इति ।**
**सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥**[7]

महर्षिः तस्यै प्रतिवचनमदात् - 'मैत्रेयी! भवत्याः कथनेन पूर्वादपि त्वं मह्यम् अतिवत्सला, अहं तुभ्यम् अमृतत्वोपदेशं करोमि । तद्भवती निध्यायतु' इति । याज्ञवल्क्यः मैत्रेय्यै ब्रह्मस्वरूपम् उपदिदेश, वनं जगाम च। मैत्रेयीऽपि ब्रह्मज्ञानं प्राप्य आनन्दमनुबभूव ।

**वाचक्नवी गार्गी**

वैदिकसाहित्यजगति ब्रह्मवादिन्याः विदुष्याः गार्ग्याः नाम अत्यन्तं प्रसिद्धम् । अस्याः उल्लेखनं बृहदारण्यकोपनिषदि दृश्यते । अमुष्याः पितुर्नाम 'वचक्नुः' इति । वचक्नोः अपत्यं स्त्री इत्यनेन अस्याः नाम 'वाचक्नवी' अभूत् । गार्गगोत्रे उत्पन्नत्वात् 'गार्गी' इति नाम्ना प्रसिद्धा ।कदाचित् विदेहराज्यभूपतिः जनकः बृहत्यज्ञमकरोत् । तदर्थं कुरुपाञ्चालादिदेशेभ्यः विद्वब्राह्मणाः आगच्छन् । विद्याप्रेमी जनकः विद्वज्जनैः तात्विकविवेचनं कर्तुं व्यवस्थामकरोत् । तद्विद्वगोष्ठ्यां ब्रह्मवादिनी गार्गी अपि आसीत् । सर्वेभ्यः विद्वांसेभ्यः गार्गी ब्रह्मतत्वमधिकृत्य याज्ञवल्क्यं बहुविधप्रश्नान् अपृच्छत्, याज्ञवल्क्योऽपि तेभ्यः उत्तराणि दत्वा तैः सम्मानितः ।

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न जातु युष्माकमिमं कश्चिद् ब्रह्मोघं जेतेति पृच्छ गार्गीति ॥

**"सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद् ब्रह्मोघं जेतेति ततो ह वाचक्नव्युपरराम "॥**[8]

एतेन गार्गी अत्युन्नततत्वं ब्रह्मतत्वज्ञानं प्राप्तवती इति ज्ञायते ।

**सूर्या**

ऋग्वेदसंहितायाः दशममण्डलस्य पञ्चाशीतिसूक्तस्य सप्तचत्वारिंशत् ऋचाः ब्रह्मवादिनीसूर्यायाः विवाहसम्बन्धसूक्तानि । आरम्भऋचासु चन्द्रमसा सह सूर्यकन्यायाः सूर्यायाः विवाहवर्णनं क्रियते । एतस्मिन् विवाहे आध्यात्मिकार्थम् ऐतिहासिकतथ्यञ्च विद्यते । यत्र चन्द्रसूर्यौ नक्षत्ररूपाभ्यां दृश्येते, तत्र आलङ्कारिकभाषायाम् आध्यात्मिकवर्णनम् उपलभ्यते । यत्र सूर्या अधिष्ठात्रीदेवतारूपेण दृश्यते, तत्र देवतारूपेण तस्याः वर्णनं क्रियते ।यदा सूर्या पत्या चन्द्रमसा

INTERNATIONAL JOURNAL OF EXPLORING EMERGING TRENDS IN ENGINEERING
Peer-Reviewed, Refereed, Indexed and International Journal, https://ijoeete.com/
|ISSN No. 2394-0573 |Volume: 10, Issue: 2 | July - Dec 2023

सह अगच्छत्, तदा तस्य रथः मनसः वेगमिव वेगेन अगच्छत् । सूर्यायै तस्याः पिता स्त्रीधनरूपेण गोस्वर्णवस्त्रप्रदेशादीन् दत्वा पतिगेहे कथमाचरणीयम् इत्युपदेशञ्च ददौ ।

**उपसंहारः**

स्त्रियः एव सत्यप्रतिष्ठोन्नतसमाजमुत्पादयन्ति इति वेदाः प्रतिपादयन्ति । मनुस्मृत्यादयः पत्नी द्वारा एव पतिः पुरुषार्थान् प्राप्नोति इति प्रतिपादयन्ति ।' मनुष्यजीवनं पुरुषार्थानाधृत्यैव भवितव्यम्, नो चेत् व्यर्थमेव । मानवजीवनं सफलीकर्तुं स्त्रियः एव आधारभूताः इत्यपि वेदेतिहासैः विशदीकृतम् ।रामायणे उल्लिखितस्त्रियः सीता, कौसल्या, अहल्या, अनसूया, तारा, मन्दोदर्यादयः स्त्रियः स्वोत्तमगुणैः कुटुम्बपरिपालनैश्च आदर्शस्त्रीरूपेण शोभन्ते । सीतायाः पातिव्रत्यं, सहिष्णुता, प्रेमत्वम्, विनम्रता, धर्मपरायणता इत्यादयः गुणाः प्रत्येकस्त्रिया आवश्यमाचरणीयाः । एवमेव सावित्री, ब्राह्मणस्त्री, सुकन्या, शची, च स्वपातिव्रत्येन पतिं रक्षित्वा सुखमनुभूतवत्याः ।एतासु स्त्रीषु अहल्या, द्रौपदी, तारा, सीता, मन्दोदरी इति पञ्चस्त्रियः पतिव्रतास्त्रीषु अग्रगण्याः इति स्मर्यन्ते एतत्पञ्चस्त्रीस्मरणेन महापातकमपि नश्यति इति ब्रह्मपुराणं निर्दिशति ।वेदेतिहासेषु स्त्रियः स्वोत्तमगुणैः उन्नतस्थानम् अलभन्त । अद्यतनस्त्रियः जीवनसफलार्थं पूर्वतनाध्यायेषु प्रतिपादितोत्तमस्त्रीगुणान् स्वीकृत्य तदाचर्य श्रेयसं प्राप्नुयुः इति विश्वासः क्रियते ।

*****************

**सन्दर्भसूचिका**

1. मनु.स्मृ-2.13 2. म.भा-शा.प.270.43 3. नि-1.20 4. ब्.दे-2.82-84
5. ब्.दे-7.46-48 6. बृ.उ - 2.4.2 7. बृ.उ- 2.4.3 8. बृ.उ-3.8.12

**सहायकग्रन्थाः** –

**1.मनुस्मृतिः**

Author : Rameshwar Bhatt

Publisher: Chaukamba (2015)

**2. महाभारतम्**

Author : Sastri Pandeya Ram

Publisher : Ghorakpur,Gita Press

**3. निघण्टुसमन्वितम् निरुक्तम्**

Author : ShivanarayanaSastri Publisher : Parimala Publication

**4.बृहद्देवता**

Author: Ramkumar Rai

Publisher : Chaukamba

**5. अथर्ववेदसंहिता**

Author: Saran Singh

Publisher : NAG Publication

**6. बृहदारण्यकोपनिषद्**

Author : Swami Madhavananda Publisher : Advaita Ashrama